घुण्टः, पुं, (घुण्यते परिहृयतेऽनेन । घुट+ बाहुलकात् कः निपातनात् मुम् च ।) गुल्फः । इति शब्दमाला ॥ [हेमचन्द्रः ॥

घुण्टकः, पुं, (घुण्ट+स्वार्थे कन् ।) गुल्फः । इति घुण्टिकं, क्ली, (घुण्ट इव कायतीति । कै+ कः ।) वनस्थकरीषम् । इति शब्दचन्द्रिका ॥ विलघुंटे इति भाषा ॥ [शब्दादिकोषः ॥

घुणः, पुं, (घोषते भ्राम्यतीति ।) भ्रमरः । इत्यु-

घुर, श भनौ । भीमार्थे । इति कविकल्पद्रुमः ॥ (तुदां-परं-अकं-सेट् ।) भीमो भयानकरसस्तस्य यथी निमित्तं हेतुरिति यावत् भीमार्थः। श, घुरति बाघो मनुष्याणां भयहेतुर्भवतीत्यर्थः। घुर भीमार्थशब्दयोरिति प्राञ्चः । आर्त्त इति शब्दविशेषणमिति रमानाथः । घुरत्यार्त्तं च कुवते इति । शब्दानुकृतौ भट्टमल्लः । घोरिता । इति दुर्गादासः ॥

घुर्घुरः, पुं, (घुरति मनुष्याणां भयहेतुर्भवतीति । घुर+क्विप् । तत: घुरो भयानकात् जन्तोरपि घुरः भयानकः । एतद्दशनेन प्रायशो न्त्वल्पसम्भवादेव तथात्वम् ।) कीटविशेषः । घुरघुरिया इति भाषा ॥ तत्पर्य्यायः । यमकीटः२ । इति त्रिकाण्डशेषः ॥ घर्घुर्वा ३ । इति रत्नमाला ॥ (शूकरशब्दः । इति चिन्तामणिः ॥)

घुर्घुरी, स्त्री, (घुर्घुरः शूकरशब्दस्तदयत्तशब्दः सोऽस्या अस्तीति । घुर्घुर+"अर्श आदिभ्योऽच् ।" ५ । २ । १२७ । इत्यच् । ततो गौरादित्वात् ङीष् ।) जलजन्तुविशेषः । तत्पर्य्यायः । स्तुकिरा २ । इति त्रिकाण्डशेषः ॥

घुलचः, पुं, गवेधुका । इति रत्नमाला ॥ गड़गड़ इति भाषा ॥

घुलघुलारवः, पुं, (घुल् घुल् इत्यव्यक्तमारौतीति । आ+रु+अच् ।) पारावतभेदः । इति राजनिर्घण्टः ॥

घुष, इ ङ घृषे । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-सकं-सेट् ।) घृषः कान्तिकृतिः । इ, घुंषति । ङ, घुंषते चन्दनं गात्रम् । इति दुर्गादासः ॥

घुष, इर् वधे । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् ।) इर्, अघुषत् अघोषीत् । इति दुर्गादासः ॥

घुष, कि इर् नुतौ । स्तुतौ इति यावत् । विशब्दे । इति कविकल्पद्रुमः ॥ (चुरां पक्षे भ्वां-परं-सकं-सेट् ।) विशब्द इह कथनं आविष्करणं नानाशब्दकरणं वा आङ्पूर्ब्बकः सततक्रन्दने । इति तट्टीका ॥ कि, घोषयति घोषति गूढ़मर्थमभियुक्तः । नानाशब्दे वाद्यं घोषयति द्वारि यस्य कश्चिदुपद्रुतः । इति हलायुधः । इर्, अघुषत् अघोषीत् । घुष किरन्तुवर्त्तते । कि, आघोषयति आघोषति शोकार्त्तः सततं क्रन्दतीत्यर्थः । इति दुर्गादासः ॥

घुषितं, त्रि, (घुष्यते स्म इति । घुष विशब्दे+ क्तः । "घुषिरविशब्दने ।" ७ । २ । २३ । इति कथनात् अत्र इट् ।) शब्दितम् । इति सुपद्मं व्याकरणम् ॥

घुष्टं, त्रि, (घुष्यते स्म इति । घुष+"क्षुब्धस्वान्तध्वान्तलग्नम्लिष्टविरिब्धफाण्टबाढानि मन्थमनस्तमःसक्ताविस्पष्टस्वरानायासभृशेषु" इति सुग्धबोधसूत्रात् निपातनात् साधुः ।) शब्दितम् । इति सुग्धबोधम् ॥ (यथा, हरिवंशे । २० । ५६ ।

"हंससारसघुष्टेषु कारण्डवरुतेषु च ॥"

शब्दितान्यदर्थे तु "घुषिरविशब्दने ।" ७ । २ । २३ । इति नेट् । "घुष्टा रज्जुः ।" इति सिद्धान्तकौमुदी ॥)

घुसृणं, क्ली, (घुष्यते स्तूयते इति भावः । घुष+ बाहुलकात् ऋणक् । पृषोदरादित्वात् साधुः । यद्वा घुंष्यते कान्तिविशिष्टं क्रियते शरीरमनेन । घुषि धृषौ+ऋणक् ।) कुङ्कुमम् । इति त्रिकाण्डशेषः ॥ (यथा, काशीखण्डे । २६ । ५७ ।

"घुसृणपिञ्जरतनुर्घर्घरा घर्घरस्वना ॥"

यथा च भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ।

"चन्दनं घुसृणोपेतं न्मृगनाभिसमायुतम् ।
न चोष्णं न च वा शीतं वर्षाकाले तदिष्यते ॥"
इति घुसृणकुङ्कुमम् ॥)

घूकः, पुं, (घू इत्यव्यक्तशब्देन कायति शब्दायते इति । घू+कै+कः ।) उलूकः । इति हेमचन्द्रः । ४ । ३६ ॥

घूकारिः, पुं, (घूकस्य पेचकस्य अरिः शत्रुः ।) काकः । इति हेमचन्द्रः । ४ । ३८८ ॥

घूकावासः, पुं, (घूकानां पेचकानां आवासो वासस्थानम् ।) शाखोटवृक्षः । इति राजनिर्घण्टः ॥

घूर, य ङ ई हिंसावयोहान्योः । इति कविकल्पद्रुमः॥ (दिवां-आत्मं-सकं-अकं च-सेट् ।) दीर्घी । य ङ, घूर्य्यते । ई, घूर्णः । वयोहानिर्मतवङ्कुवयोभावः । इति दुर्गादासः ॥

घूर्ण, ज श भ्रमणे । इति कविकल्पद्रुमः ॥ (तुदां-उभं-अकं-सेट् ।) ज, घूर्णति घूर्णते । श, घूर्णती घूर्णन्ती । इति दुर्गादासः ॥ (यथा, गोः रामायणे । ४ । १५ । २५ ।

"स तु वाली रणगतः सालताड़नविह्वलः ।
गुरुभारसमाक्रान्तश्चचाल च जुघूर्ण च ॥")

घूर्णः, पुं, (घूर्णति स्वोत्पत्तिभूमौ घूर्णाकारेण सम्भवतीति । घूर्ण+अच् । घूर्णाकारेण जायमानत्वात् तथात्वम् ।) शोभाञ्जनवृक्षः । इति शब्दचन्द्रिका ॥ गोमा इति भाषा ॥ (घूर्ण+भावे अच् ।) भ्रमणञ्च ॥ (विघूर्णिते, त्रि । यथा, भागवते । ७ । २ । २ ।

"आह चेदं रुषा घूर्णः संदष्टदशनच्छदः ॥")

घूर्णनं, क्ली, (घूर्ण+भावे ल्युट् ।) भ्रमणम् । तत्पर्य्यायः । चक्रावर्त्तः २ भ्रमः ३ भ्रान्तिः ४ भ्रमिः ५ घूर्णिः ६ । इति हेमचन्द्रः । ६।१५५ ॥ (यथा, गीतगोविन्दे । ६ । ११ ।

"अनिलतरलकुवलयनयनेन घूर्णनमद्मन्दारविलम्बन-स्तवकाकेलिकलकपरमधामशाठ्य कुरङ्गीदृशाम् ॥")

घूर्णायमानः, त्रि, (घूर्ण इवाचरतीति । घूर्ण+क्यङ् । ततो घूर्णायते इति । घूर्णाय+शानच् ।) भ्राम्यमाणः । यथा, कलापधातुव्याख्यासारे ।

"इन्द्रादेरखिलार्थसाधनपरैः संस्तूयमानं मुहुः पीतोभ्मत्तफलातुलालसतया घूर्णायमानेक्षणम् ॥"

घूर्णिः, स्त्री, (घूर्ण+"सर्व्वधातुभ्य इन् ।" उणां । ४ । ११७ । इति भावे इन् ।) घूर्णनम् । इति हेमचन्द्रः । ६ । १५५ ॥

घूर्णितः, त्रि, (घूर्णते स्म इति । घूर्ण+क्तः ।) भ्रमितः । तत्पर्य्यायः । प्रचलायितः २ । इत्यमरः । ३ । १ । ३२ ॥ (यथा, कथासरित्सागरे । २४ । १ ।

"मदघूर्णितवक्त्रोत्थैः सिन्दूरैस्तूरयन् महीम् ।
हेरम्बः पातु वो विघ्नान् स्वतेजोभिर्दहन्निव ॥")

घूर्ण्यमानः, त्रि,(घूर्ण्यते इति । घूर्ण+णिच्+कर्म्मणि शानच् ।) भ्राम्यमाणः । यथा, महानाटके ।

"भो दृष्टाः पर्व्वतस्था बहुकुसुमयुता वायुना घूर्ण्यमानाः ॥"

अणिजन्ते तु घूर्णमाण इत्येव स्यात् । यथा, हरिवंशे ४८ । ३६ ।

"भ्रमन्तं घूर्णमानञ्च स्तुतिं देवाः प्रचक्रिरे ॥")

घृ, सेके । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-अनिट् ।) घरति तरुं मेघः । इति दुर्गादासः ॥

घृ, क सेके । छादने । इति कविकल्पद्रुमः ॥ (चुरां-परं-सकं-अनिट् ।) क, घारयति । इति दुर्गादासः ॥

घृ, र लि भासि । सेके । इति कविकल्पद्रुमः ॥ (ह्वां-परं-अकं-अनिट् ।) र वैदिकः । लि, जघर्त्ति घृतं दीप्यते क्षरति वेत्यर्थः । इति दुर्गादासः ॥

घृण, इ ङ ग्रहणे । कविकल्पद्रुमः ॥ (भ्वां आत्मं-सकं-सेट् ।) इ, घृण्यते । ङ, घृण्यते जरीघृण्यते । इति दुर्गादासः ॥

घृण, इ ञ उ दीप्तौ । इति कविकल्पद्रुमः ॥ (तनां-उभं-अकं-सेट् । उदित्वात् क्त्वावेट् ।) इ ञ, घृणोति घर्णोति । घृणुते घर्णुते । उ, घर्णित्वा घृत्वा । इति दुर्गादासः ॥

घृणा, स्त्री, (घ्रियते सिच्यते हृदयमनया । । घृ सेके+बाहुलकात् नक् स्त्रियां टाप् । दयारसेन हि हृदयं सिक्तमिवार्द्रं भवतीति तथात्वम् ।) करुणा । (यथा, किरातार्ज्जुनीये । १५ । १३ ।

"मन्दमस्यन्निषुलतां घृणया मुनिरेष वः ।
प्रणुदत्यागतावज्ञं जघनेषु पशूनिव ॥" * ॥

घ्रियते आच्छाद्यते गुणादिकमनयेति ।) जुगुप्सा । तत्पर्य्यायः । अर्त्तनम् २ ऋतीया ३ हृणीया ४ । इत्यमरः । ३ । २ । ३२ ॥ रोण्या५ हृणिया ६ हिणीया ७ हृणीया ८ । इति तट्टीका ॥ (यथा, रघुः । ११ । १७ ।

"तां विलोक्य वनितावधे घृणां
पत्रिणा सह मुमोच राघवः ॥")

घृणावासः, पुं, (घृणायाः आवासः ।) कुष्माण्डः । इति त्रिकाण्डशेषः ॥ घृणायुक्ते त्रि ॥